# श्रीगोपालतापनीयोपनिषत्

# Śrī Gopālatāpanīyopaniṣat

Version 0.1

पण्डितयान्बृजिन्स्किसम्पादिता

edited by Jan Brzezinski

22 May 2000

ओं कृष्णाय नमः ।

# पूर्वतापनीयोपनिषत्

ओं सच्चिदानन्दारूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥

ओं मुनयो ह वै ब्रह्माणमूचुः । कः परमो देवः । कुतो मृत्युर्बिभेति । कस्य विज्ञानेनाखिलं विज्ञातं भवति । केनेदं विश्वं संसरतीति ॥

तदु होवाच ब्राह्मणः । कृष्णो वै परमं दैवतम् । गोविन्दान्मृत्युर्बिभेति । गोपीजनवल्लभज्ञानेन तज्ज्ञातं भवति । स्वाहयेदं संसरतीति ॥

तदु होचुः । कः कृष्णो गोविन्दश्च कोऽसौ गोपीजनवल्लभः कः का स्वाहेति ॥

तानुवाच ब्राह्मणः पापकर्षणो गोभूमिवेदविदितो विदिता गोपीजनाविद्याकलाप्रेरकस्तन्माया चेति । सकलं परं ब्रह्मैव तत् ॥

यो ध्यायति रसति भजति सोऽमृतो भवति सोऽमृतो भवतीति ॥

ते होचुः किं तद्रूपं किं रसनं कथं वाहो तद्भजनं । तत्सर्वं विविदिषताम् आख्याहीति ॥

तदु होवाच हैरण्यः । गोपवेशम् अभ्राभं तरुणं कल्पद्रुमाश्रितम् ॥

तदिह श्लोका भवन्ति ।

सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम् ।
द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम् ॥
गोपगोपीगवावीतं सुरद्रुमतलाश्रितम् ।
दिव्यालङ्करणोपेतं रत्नपङ्कजमध्यगम् ॥
कालिन्दीजलकल्लोलसङ्गिमारुतसेवितम् ।
चिन्तयंश्चेतसा कृष्णं मुक्तो भवति संसृतेरिति ॥

तस्य पुना रसनमिति । जलभूमीन्दुसम्पातकामादि कृष्णायेत्येकं पदम् । गोविन्दायेति द्वितीयम् । गोपीजनेति तृतीयम् । वल्लभायेति तुरीयम् । स्वाहेति पञ्चममिति पञ्चपदीं जपन् पञ्चाङ्गं द्यावाभूमीसूर्याचन्द्रमसौ साग्नी तद्रूपतया ब्रह्म सम्पद्यते ब्रह्म सम्पद्यत इति ॥

तदेष श्लोकः ।

क्लीमित्येतदादावादाय कृष्णाय गोविन्दाय गोपीजनवल्लभायेति ।
बृहद्मानव्या सकृदुच्चरेद्यो गतिस्तस्यास्ति मङ्क्षु नान्या गतिः स्यादिति ॥

भक्तिरस्य भजनम् । तदिहामुत्रोपाधिनैरास्येनैवामुष्मिन् मनसः कल्पनम् । एतदेव च नैष्कर्म्यम् ॥

कृष्णं तं विप्रा बहुधा यजन्ति गोविन्दं सन्तं बहुधाराधयन्ति ।
गोपीजनवल्लभो भुवनानि दध्रे स्वाहाश्रितो जगदैजत्सुरेताः ॥
वायुर्यथैको भुवनं प्रविष्टो जन्ये जन्ये पञ्चरूपो बभूव ।
कृष्णस्ततहिकोऽपि जगद्धितार्थं शब्देनासौ पञ्चपदो विभातीति ॥

ते होचुरुपासनमेतस्य परमात्मनो गोविन्दस्याखिलाधारिणो ब्रूहीति ॥

तानुवाच । यत्तस्य पीठं हैरण्याष्टपलाशाम्बुजम् । तदान्तरालिकेऽनलास्त्रयुगं तदन्तराद्यार्णाखिलबीजं कृष्णाय नम इति बीजाढ्यं सब्रह्माणमाधायानङ्गगायत्रीं यथावद् व्यालिख्य भाउमण्डलं शूलवेष्टितं कृत्वाङ्गवासुदेवादिरुक्मिण्यादिस्वशक्तीन्द्रादि-वसुदेवादि-पार्थादिनिध्यावीतं यजेत् सन्ध्यासु प्रतिपत्तिभिरुपचारैः । तेनास्याखिलं भवत्यखिलं भवतीति ॥

तदिह श्लोका भवन्ति ।

एको वशी सर्वगः कृष्ण ईड्य एकोऽपि सन् बहुधा यो विभाति ।
तं पीठस्थं येऽनुभजन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥
नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।
तं पीट्थगं येऽनुभजन्ति धीरास्तेषां सिद्धिः शाश्वती नेतरेषाम् ॥
एतद्विष्णोः परमं पदं ये नित्यमुक्ताः संयजन्ते न कामान् ।
तेषामसौ गोपरूपः प्रयत्नात् प्रकाशयेदात्मपदं तदैव ॥
यो वै ब्रह्माणं विदधाति पूर्वं यो विद्यास्तस्मै गोपायेति स्म कृष्णः ।
तं ह दैवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमनुव्रजेत ॥
ओंकारेणान्तरितं ये जपन्ति गोविन्दस्य पञ्चपदं मनुम् ।
तेषामसौ दर्शयेदात्मरूपं तस्मान्मुमुक्षुरभ्यसेन्नित्यशान्त्यै ॥
एतस्मादन्ये पञ्चपदादभूवन् गोविन्दस्य मनवो मानवानाम् ।
दशार्णाद्यास्तेऽपि सङ्क्रन्दनाद्यरभ्यस्यन्ते भूतिकामैर्यथावत् ॥

यदेतस्य स्वरूपार्थं वाचा वेदयन्ति ते पप्रच्छुः । तदु होवाच ब्रह्मसवनं चरतो मे ध्यातः स्तुतः परार्धान्ते सोऽबुध्यत गोपवेशो मे पुरुषः पुरस्तादाविर्बभूव ॥

ततः प्रणतो मयानुकूलेन हृदा मह्यम् अष्टादशार्णं स्वरूपं सृष्टये दत्त्वान्तर्हितः पुनः सिसृक्षतो मे प्रादुरभूत् । तेष्वक्षरेषु भविष्यज्जगद्रूपं प्रकाशयन् तदिह ककारादापो लकारात् पृथिवी ईतोऽग्निर्बिन्दोरिन्दुस्तत्सम्पातात् तदर्क इति क्लींकारादसृजम् । कृष्णायपदादाकाशं खाद्वायुरित्युत्तरात्सुरभिं विद्यां प्रादुरकार्षम् । तदुत्तरात् स्त्रीपुंसादि चेदं सकलमिदं सकलमिति ॥

एतस्यैव यजनेन चन्द्रध्वजो गतमोहमात्मानं वेद इत्योङ्कारान्तरालिकं मनुमावर्तयेत् सङ्गरहितोऽभ्यानयत् ॥

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तस्मादेनं नित्यमभ्यसेन्नित्यमभ्यसेदिति ॥

तदाहुरेके यस्य प्रथमपदाद्भूमिर्द्वितीयपदाज्जलं तृतीयपदात्तेजश्चेअतुर्थपदाद्वायुश्चरमपदाद्व्योम इति वैष्णवपञ्चव्याहृतिमयं मन्त्रं कृष्णावभासं कैवल्यसृत्यै सततमावर्तयेदिति ॥

तदत्र गाथा ।

यस्य पूर्वपदाद्भूमिर्द्वितीयात्सलिलोद्भवः ।
तृतीयात्तेज उद्भूतं चतुर्थाद्गन्धवाहनः ॥
पञ्चमादम्बरोत्पत्तिस्तमेवैकं समभ्यसेत् ।
चन्द्रध्वजोऽगमद्विष्णुः परमं पदमव्ययम् ॥
ततो विशुद्धं विमलं विशोकमशेषलोभादिनिरस्तसङ्गम् ।
यत्तत्पदं पञ्चपदं तदेव स वासुदेवो न यतोऽन्यदस्ति ॥

तमेकं गोविन्दं सच्चिदानन्दविग्रहम् पञ्चपदं वृन्दावनसुरभूरुहतलासीनं सततं समरुद्गणोऽहं परमया स्तुत्या तोषयामि ॥

ओं नमो विश्वरूपाय विश्वस्थित्यन्तहेतवे ।
विश्वेश्वराय विश्वाय गोविन्दाय नमो नमः ॥
नमो विज्ञानरूपाय परमानन्दरूपिणे ।
कृष्णाय गोपीनाथाय गोविन्दाय नमो नमः ॥
नमः कमलनेत्राय नमः कमलमालिने ।
नमः कमलनाभाय कमलापतये नमः ॥
बर्हापीडाभिरामाय रामयाकुण्ठमेधसे ।
रमामानसहंसाय गोविन्दाय नमो नमं ॥
कंसवंशविनाशाय केशिचाणूरघातिने ।
वृषभध्वजवन्द्याय पार्थसारथये नमः ॥
वेणुवादनशीलाय गोपालायाहिमर्दिने ।
कालिन्दीकूललोलाय लोलकुण्डलधारिणे ॥
वल्लवीवदनाम्भोजमालिने नृत्यशालिने ।
नमः प्रणतपालाय श्रीकृष्णाय नमो नमः ॥
नमः पापप्रणाशाय गोवर्धनधराय च ।
पूतनाजीवितान्ताय तृणावार्तासुहारिणे ॥
निष्कलाय विमोहाय शुद्धायाशुद्धवैरिणे ।
अद्वितीयाय महते श्रीकृष्णाय नमो नमः ॥
प्रसीद परमानन्द प्रसीद परमेश्वर ।

आधिव्याधिभुजङ्गेन दष्टं मामुद्धर प्रभो ॥
श्रीकृष्ण रुक्मिणीकान्त गोपीजनमनोहर ।
संसारसागरे मग्नं मामुद्धर जगद्गुरो ॥
केशव क्लेशहरण नारायण जनार्दन ।
गोविन्द परमानन्द मां समुद्धर माधव ॥

अथैवं स्तुतिभिराराधयामि यथा यूयं तथा पञ्चपादं जपन्तः श्रीकृष्णं ध्यायन्तः संसृतिं तरिष्यथेति होवाच हैरण्यः ॥

अमुं पञ्चपदं मन्त्रमावर्तयेद्यः स यात्यनायासतः केवलं तत्पदं तत् ।
अनेजदेकं मनसो जवीयोनैतद्देवा आप्नुवन् पूर्वमर्षदिति ॥

तस्मात्कृष्ण एव परो देवस्तं ध्यायेत्तं रसेत्तं यजेत्तं भजेदिति ओं तत्सदिति ॥

# उत्तरतापनीयोपनिषत्

एकदा हि व्रजस्त्रियः सकामाः शर्वरीमुषित्वा सर्वेश्वरं गोपालं कृष्णमूचिरे ।उवाच ताः कृष्णः । अनु कस्मै ब्राह्मणाय भक्ष्यं दातव्यं भवति । दुर्वासस इति । कथं यास्यामोऽतीर्त्वा जलं यमुनाया यतः श्रेयो भवति । कृष्णो ब्रह्मचारीत्युक्त्वा मार्गं वो दास्यति यं मां स्मृत्वा अगाधा गाधा भवति ।यं मां स्मृत्वा अपूतः पूतो भवति ।यं मां स्मृत्वा अवती व्रती भवति ।यं मां स्मृत्वा सकामो निष्कामो भवति ।यं मां स्मृत्वाश्रोत्रियः श्रोत्रियो भवति ॥

श्रुत्वा तद्वाचं हि वै रौद्रं स्मृत्वा तद्वाक्येन तीर्त्वा तत्सौर्या हि गत्वाश्रमं पुण्यतमं हि नत्वा मुनिण् श्रेष्ठतमं हि वै रौद्रं चेति । दत्त्वा अस्मै ब्राह्मणाय क्षीरमयं घृतमयमिष्टतमं हि वै ।मिष्टतमं हि वै भुक्त्वा हित्वाशिषं प्रयुज्य अनुज्ञां त्वदात् ॥

ता ऊचुः । कथं यास्यामोऽतीर्त्वा सौर्याम् । स होवाच मुनिः दुर्वाशिनं मां स्मृत्वा वो दास्यतीति मार्गम् ॥

तासां मध्ये हि श्रेष्ठा गान्धर्वी ह्युवाच तं हि वै ताभिर् एवं कथं कृष्णो ब्रह्मचारी कथं दुर्वाशनो मुनिः ।तां हि मुख्यां विधाय पूर्वम् अनुकृत्वा तूष्णीमासुः ॥

शब्दवानाकाशः । शब्दाकाशाभ्यां भिन्नः । तस्मिन्नाकाशस्तिष्ठति । आकाशे तिष्ठति ।स ह्याकाशस्तं न वेद ।स ह्यात्माहं कथं भोक्ता भवामि ॥

तासां मध्ये हि श्रेष्ठा गान्धर्वी ह्युवाच तं हि वै ताभिर् एवं विचार्य ।कथं कृष्णो ब्रह्मचारी कथं दुर्वाशिनो मुनिः ।तां हि मुख्यां विधाय पूर्वमनुकृत्वा तूष्णीमासुः ॥

शब्दवानाकाशः । शब्दाकाशाभ्यां भिन्नः । तस्मिन्नाकाशस् तिष्ठति । स ह्याकाशस्तं न वेद स ह्यात्माहं कथं भोक्ता भवामि ॥

स्पर्शवान् वायुः ।स्पर्शवायुभ्यां भिन्नः ।तस्मिन् वायौ तिष्ठति ।वायुर्न न वेद तं हि स ह्यात्माहं कथं भोक्ता भवामि ॥

रूपवदिदं हि तेजः । रूपाग्निभ्यां भिन्नः । तस्मिन्नग्निस्तिष्ठति । अग्निर्न न वेद तं हि स ह्यात्माहं कथं भोक्ता भवामि ॥

रसवत्य आपः । रसाब्भ्यो भिन्नः । तस्मिन्नापस्तिष्ठन्ति । अप्सु तिष्थाति । आपस्तं न विदुः ।स ह्यात्माहं कथं भोक्ता भवामि ॥

गन्धवतीयं भूमिः । गन्धभूमिभ्यां भिन्नः । तस्मिन् भूमिस्तिष्ठति । भूमौ तिष्थाति ।भूमिस्तं न वेद ।स ह्यात्माहं कथं भोक्ता भवामि ॥

इदं हि मनः एवेदं मनुते ।तानीदं हि गृह्णाति ।यन्न सर्वमात्मैवाभूत्तत्र वा कुत्र मनुते क्क वा गच्छतीति ।स ह्यात्माहं कथं भोक्ता भवामि ॥

अयं हि कृष्णो यो वो हि प्रेष्ठः शरीरद्वयकारणं भवति । द्वा सुपर्णौ भवतो ब्रह्मणोऽहं सम्भूतस्तथेतरो भोक्ता भवति । अन्यो हि साक्षी भवतीति । वृक्षधर्मे तौ तिष्ठतः । अतो भोक्तृभोक्तारौ ।पूर्वो हि भोक्ता भवति तथेतरोऽभोक्ता कृष्णो भवतीति ॥

यत्र विद्याविद्ये न विदामो विद्याविद्याभ्यां भिन्नः । विद्यामयो हि यः स कथं विषयी भवतीति । यो ह वै कामेन कामान् कामयते स कामी भवति । यो ह वै त्वकामेन कामान् कामयते सोऽकामी भवति ॥

जन्मजराभ्यां भिन्नः स्थाणुरयमच्छेद्योऽयं योऽसौ सौर्ये तिष्ठति योऽसौ गोषु तिष्ठति योऽसौ गाः पालयति । योऽसौ गोपेषु तिष्ठति । योऽसौ सर्वेषु वेदेषु तिष्ठति । योऽसौ सर्ववेदैर्गीयते । योऽसौ सर्वेषु भूतेष्वाविश्य भूतानि विदधाति स वो हि स्वामी भवति ॥

सा ह्युवाच गान्धर्वी कथं वास्मासु जातोऽसौ गोपालः । कथं वा ज्ञातोऽसौ त्वया मुने । कृष्णः को वास्य ज्यायान् रामो भवति । कीदृशी पूजास्य गोपालस्य भवति साक्षात्प्रकृतिपरो योऽयमात्मा गोपालः कथं त्ववतीर्णो भूम्यां हि वै स होवाच तां ह वै ॥

एको ह वै पूर्वं नारायणो देवः । यस्मिन् लोका ओताश्च प्रोताश्च । तस्य हृत्पद्माज्जातोऽब्जयोनिस्तपित्वा तस्मै हि वरं ददौ । स कामप्रश्नमेव वव्रे तं हास्मै ददौ ॥

स होवाचाब्जयोनिर्योऽवताराणां मध्ये श्रेष्ठोऽवतारः को भवति येन लोकास्तुष्टा भवन्ति यं स्मृत्वा मुक्ता अस्मात्संसाराद्भवन्ति । कथं वास्यावतारस्य ब्रह्मता भवति ॥

स होवाच तं हि नारायणो देवः सकाम्या मेरोः शृङ्गे यथा सप्तपूर्यो भवन्ति तथा निष्काम्याः सकाम्या भूगोलचक्रे सप्तय्पूर्यो भवन्ति । तासां मध्ये साक्षाद्ब्रह्म गोपालपुरीति ॥

सकाम्या निष्काम्या देवानां सर्वेषां भूतानां भवति यथा हि वै सरसि पद्मं तिष्ठति तथा भूम्यां तिष्ठतीति चक्रेण रक्षिता हि मथुरा तस्मात् गोपालपुरी भवति ॥

बृहद्बृहद्वनं मधोर्मधुवनं तालस्तालवनं काम्यं काम्यवनं बहुला बहुलावनं कुमुदं कुमुदवनं खदिरः खदिरवनं भद्रो भद्रवनं भाण्डीर इति भाण्डीरवनं श्रीवनं लोहवनं वृन्दाया वृन्दावनमेतैरावृता पुरी भवति ॥

तत्र तेष्वेव गहनेष्वेवं देवा मनुष्या गन्धर्वा नागाः किन्नरा गायन्तीति नृत्यन्तीति ॥

तत्र द्वादशादित्या एकादश रुद्रा अष्टौ वसवः सप्तमुनयो ब्रह्मा नारदश्च पञ्च विनायका वीरेश्वरो रुद्रेश्वरो अम्बिकेश्वरो गणेश्वरो नीलकण्ठेश्वरो विश्वेश्वरो गोपालेश्वरो भद्रेश्वरः अन्यानि लिङ्गानि चतुर्विंशतिर्भवन्ति ॥

द्वे वने स्तः कृष्णवनं भद्रवनं तयोरन्तर्द्वादशवनानि पुण्यानि पुण्यतमानि तेष्वेव देवास्तिष्ठन्ति सिद्धाः सिद्धिं प्राप्ताः । तत्र हि रामस्य राममूर्तिः प्रद्युम्नस्य प्रद्युम्नमूर्तिरनिरुद्धस्यानिरुद्धमूर्तिः कृष्णस्य कृष्णमूर्तिः ॥

वनेष्वेवं मथुरास्वेवं द्वादशमूर्तयो भवन्ति । एकां हि रुद्रा यजन्ति । द्वितीयां हि ब्रह्मा यजन्ति । तृतीयां ब्रह्मजा यजन्ति । चतुर्थीं मरुतो यजन्ति । पञ्चमीं विनायका यजन्ति । षष्ठीं वसवो यजन्ति । सप्तमीमृषयो यजन्ति । अष्टमीं गन्धर्वा यजन्ति । नवमीमप्सरसो यजन्ति । दशमी वै ह्यन्तर्धाने तिष्ठति । एकादशीमेति स्वपदं गता । द्वादशम् एति भूम्यां तिष्ठति ॥

तां हि ये यजन्ति ते मृत्युं तरन्ति मुक्तिं लभन्ते । गर्भजन्मजरामरणतापत्रयात्मकं दुःखं तरन्ति ॥

तदप्येते श्लोका भवन्ति ।

प्राप्य मथुरां पुरीं रम्यां सदा ब्रह्मादिसेवितम् ।
शङ्खचक्रगदाशार्ङ्गरक्षितां मुषलादिभिः ॥
यत्रासौ संस्थितः कृष्णस्त्रिभिः शक्त्या समाहितः ।
रामानिरुद्धप्रद्युम्नै रुक्मिण्या सहितो विभुः ॥

चतुःशब्दो भवेद् एको ह्योंकारः समुदाहृतः ॥

तस्माद्देवः पुरो रजसेति सोऽहमित्यवधार्यात्मानं गोपालोऽहमिति भावयेत् । स मोक्षमश्नुते स ब्रह्मत्वमधिगच्छति स ब्रह्मविद् भवति । यो गोपान् जीवान्

वै आत्मत्वेनासृष्टिपर्यन्तमालाति स गोपालो भवति । ओं तद्यत्सोऽहं परं ब्रह्म कृष्णात्मको नित्यानन्दैकरूपः सोऽहमोम् । तद् गोपाल एव परं सत्यमवधारितं सोऽहमित्यात्मानमादाय मनसैक्यं कुर्यादात्मानं गोपालोऽहमिति भावयेदिति स एवाव्यक्तोऽनन्तो नित्यो गोपालः ॥

मथुरायां स्थितिर्ब्रह्मन् सर्वदा मे भविष्यति ।
शङ्खचक्रगदापद्मवनमालावृतस्तु वै ॥
विश्वरूपं परं ज्योतिःस्वरूपं रूपवर्जितं ।
हृदा मां संस्मरन् ब्रह्मन् तत्पदं याति निश्चितम् ॥
मथुरामण्डले यस्तु जम्बुद्वीपे स्थितोऽपि वा ।
योऽर्चयेत् प्रतिमां मां च स मे प्रियतरो भुवि ॥
तस्यामधिष्ठितः कृष्णरूपी पूज्यस्त्वया सदा ।
चतुर्धा चास्याधिकारभेदत्वेन यजन्ति माम् ॥
युगानुवर्तिनो लोका यजन्तीह सुमेधसः ।
गोपालं सानुजं रामं रुक्मिण्या सह तत्परम् ॥
गोपालोऽहमजो नित्यः प्रद्युम्नोऽहं सनातनः ।
रामोऽहमनिरुद्धोऽहमात्मानमर्चयेद्बुधः ॥
मयोक्तेन स्वधर्मेण निष्कामेण विभागशः ।
तैरयं पूजनीयो वै भद्रकृष्णनिवासिभिः ॥
तद्धर्मगतिहीना ये तस्यां मयि परायणाः ।
कलिना ग्रसिता ये वै तेषां तस्यामवस्थितिः ॥
यथा त्वं सह पुत्रैस्तु यथा रुद्रो गणैः सह ।
यथा श्रियाभियुक्तोऽहं तथा भक्तो मम प्रियः ॥

स होवाचाब्जयोनिश्चतुर्भिर्देवैः कथमेको देवः स्यादेकमक्षरं यद्विश्रुतमनेकाक्षरं कथं भूतम् ॥

स होवाच । तं हि वै पूर्वं हि एकमेवाद्वितीयं ब्रह्मासीत् तस्मादव्यक्तमव्यक्तमेवाक्षरं तस्मादक्षरात् महत्तत्त्वं महतो वै अहंकारस्तस्मादेवाहंकारात् पञ्चतन्मात्राणि तेभ्यो भूतानि तैरावृतमक्षरं भवति । अक्षरोऽहमोंकारोऽहमजरोऽमरोऽभयोऽमृतो

ब्रह्माभयं हि वै स मुक्तोऽहमस्मि । अक्षरोऽहमस्मि सत्तामात्रं विश्वरूपं प्रकाशं व्यापकं तथैकमेवाद्वितीयं ब्रह्म मायया तु चतुष्टयम् ॥

रोहिणीतनयो रामो अकाराक्षरसम्भवः ।
तैजसात्मकः प्रद्युम्नो उकाराक्षरसम्भवः ॥
प्राज्ञात्मकोऽनिरुद्धो मकाराक्षरसम्भवः ।
अर्धमात्रात्मकः कृष्णो यस्मिन् विश्वं प्रतिष्ठितम् ॥
कृष्णात्मका जगत्कर्त्री मूलप्रकृती रुक्मिणी ।
व्रजस्त्रीजनसम्भूतश्रुतिभ्यो ब्रह्मसङ्गतः ॥
प्रणवत्वेन प्रकृतिं वदन्ति ब्रह्मवादिनः ।
तस्मादोंकारसम्भूतो गोपालो विश्वसम्भवः ॥
क्लीमोंकारस्यैक्यत्वं पठ्यते ब्रह्मवादिभिः ।
मथुरायां विशेषेण मां ध्यायन् मोक्षमश्नुते ॥
अष्टपत्रं विकसितं हृतपद्मं तत्र संस्थितम् ।
दिव्यध्वजातपत्रैस्तु चिह्नितं चरणद्वयम् ॥
श्रीवत्सलाञ्छनं हृत्स्थं कौस्तुभं प्रभया युतम् ।
चतुर्भुजं शङ्खचक्रशार्ङ्गपद्मगदान्वितम् ॥
सुकेयुरान्वितं बाहुं कण्ठं मालासुशोभितम् ।
द्युमत्किरीटवलयं स्फुरन्मकरकुण्डलम् ॥
हिरण्मयं सौम्यतनुं स्वभक्तायाभयप्रदम् ।
ध्यायेन्मनसि मां नित्यं वेणुशृङ्गधरं तु वा ॥
मथ्यते तु जगत्सर्वं ब्रह्मज्ञानेन येन वा ।
तत्सारभूतं यद् यस्यां मथुरा सा निगद्यते ॥
अष्टदिक्पालिभिर्भूमिः पद्मं विकसितं जगत् ।
संसारार्णवसञ्जातं सेवितं मम मानसे ॥
चन्द्रसूर्यत्विषो दिव्यध्वजा मेरुर्हिरण्मयः ।
आतपत्रं ब्रह्मलोकमधोर्ध्वं चरणं स्मृतम् ॥
श्रीवत्सं च स्वरूपं च वर्तते लाञ्छनैः सह ।
श्रीवत्सलाञ्छनं तस्मात् कथ्यते ब्रह्मवादिभिः ॥
येन सूर्याग्निवाक्चन्द्रं तेजसा स्वस्वरूपिणा ।

वर्तते कौस्तुभाख्यं हि मणिं वदन्तीशमानिनः ॥
सत्त्वं रजस्तम इति अहंकारश्चतुर्भुजः ।
पञ्चभूतात्मकं शङ्खं करे रजसि संस्थितम् ॥
बालस्वरूपमत्यन्तं मनश्चक्रं निगद्यते ।
आद्या माया भवेच्छार्ङ्गं पद्मं विश्वं करे स्थितम् ॥
आद्या विद्या गदा वेद्या सर्वदा मे करे स्थिता ।
धर्मार्थकामकेयूरैर्दिव्यैर्दिव्यमहीरितैः ॥
कण्ठस्तु निर्गुणं प्रोक्तं माल्यते आद्ययाजया ।
माला निगद्यते बह्मांस्तव पुत्रैस्तु मानसैः ॥
कूटस्थं यत्स्वरूपं च किरीतं प्रवदन्ति माम् ।
क्षरोत्तमं प्रस्फुरन्तं कुण्डलं युगलं स्मृतम् ॥
ध्यायेन्मम प्रियो नित्यं मोक्षमधिगच्छति ।
स मुक्तो भवति तस्मै आत्मानं च ददामि वै ॥
एतत्सर्वं भविष्यद्वै मया प्रोक्तं विधे तव ।
स्वरूपं द्विविधं चैव सगुणं निर्गुणात्मकम् ॥

स होवाचाब्जयोनिः । व्यक्तीनां मूर्तीनां प्रोक्तानां कथं त्वामरणानि भवन्ति कथं वा देवा यजन्ति रुद्रा यजन्ति ब्रह्मा यजति ब्रह्मजा यजन्ति विनायका यजन्ति द्वादशादित्या यजन्ति वसवो यजन्ति गन्धर्वा यजन्ति सपदानुगा अन्तर्धाने तिष्ठन्ति कां मनुष्या यजन्ति ॥

स होवाच तं हि वै नारायणो देवः । आद्या अव्यक्ता द्वादशमूर्तयः सर्वेषु लोकेषु सर्वेषु देवेषु सर्वेषु मनुष्येषु तिष्ठन्ति । रुद्रेषु रौद्री ब्रह्मण्येवं ब्राह्मी देवेषु दैवी मनुष्येषु मानवी विनायकेषु विघ्ननाशिनी आदित्येषु ज्योतिर्गन्धर्वेषु गान्धर्वी अप्सरःस्वेवं गौर्वसुष्वेवं काम्या अन्तर्धाने प्रकाशिनी ।आविर्भावातिरोभावा स्वपदे तिष्ठति तामसी राजसी सात्त्विकी मानुषी विज्ञानघन आनन्दघनः सच्चिदानन्दैकरसे भक्तियोगे तिष्ठति ॥

ओं तत्प्राणात्मने ओं तत्सद् भूर्भुवःस्वस्तस्मै वै प्राणात्मने नमो नमः ।

ओं श्रीकृष्णाय गोविन्दाय गोपीजनवल्लभाय ओं तत्सद् भूर्भुवःस्वस्तस्मै वै प्राणात्मने नमो नमः ।

ओं अपानात्मने ओं तत्सद् भूर्भुवःस्वस्तस्मै वै प्राणात्मने नमो नमः ।

ओं कृष्णाय रामाय प्रद्युम्नायानिरुद्धाय ओं तत्सद् भूर्भुवःस्वस्तस्मै वै प्राणात्मने नमो नमः ।

ओं व्यानात्मने ओं तत्सद् भूर्भुवःस्वस्तस्मै वै प्राणात्मने नमो नमः ।

ओं श्रीकृष्णाय रामाय ओं तत्सद् भूर्भुवःस्वस्तस्मै वै प्राणात्मने नमो नमः ।

ओं उदानात्मने ओं तत्सद् भूर्भुवःस्वस्तस्मै वै प्राणात्मने नमो नमः ।

ओं कृष्णाय देवकीनन्दनाय ओं तत्सद् भूर्भुवःस्वस्तस्मै वै प्राणात्मने नमो नमः ।

ओं समानात्मने ओं तत्सद् भूर्भुवःस्वस्तस्मै वै प्राणात्मने नमो नमः ।

ओं गोपालाय निजस्वरूपाय ओं तत्सद् भूर्भुवःस्वस्तस्मै वै प्राणात्मने नमो नमः ।

ओं योऽसौ प्रधानात्मा गोपालः ओं तत्सद् भूर्भुवःस्वस्तस्मै वै प्राणात्मने नमो नमः ।

ओं योऽसाविन्द्रियात्मा गोपालः ओं तत्सद् भूर्भुवःस्वस्तस्मै वै प्राणात्मने नमो नमः ।

ओं योऽसौ भूतात्मा गोपालः ओं तत्सद् भूर्भुवःस्वस्तस्मै वै प्राणात्मने नमो नमः ।

ओं योऽसावुत्तमपुरुषो गोपालः ओं तत्सद् भूर्भुवःस्वस्तस्मै वै प्राणात्मने नमो नमः ।

ओं योऽसौ परं ब्रह्म गोपालः ओं तत्सद् भूर्भुवःस्वस्तस्मै वै प्राणात्मने नमो नमः ।

ओं योऽसौ सर्वभूताता गोपालः ओं तत्सद् भूर्भुवःस्वस्तस्मै वै प्राणात्मने नमो नमः ।

ओं योऽसौ जाग्रत्स्वप्नसुसुप्तिमतीत्य तुर्यातीतो गोपालः ओं तत्सद् भूर्भुवःस्व-स्तस्मै वै प्राणात्मने नमो नमः ॥

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेताः केवलो निर्गुणश्च ॥

रुद्राय नमः ।
आदित्याय नमः ।
विनायकाय नमः ।
सूर्याय नमः ।
विद्यायै नमः ।
इन्द्राय नमः ।
अग्नये नमः ।
यमाय नमः ।
निर्ऋतये नमः ।
वायवे नमः ।
कुबेराय नमः ।
ईशानाय नमः ।
ब्रह्मणे नमः ।
सर्वेभ्यो देवेभ्यो नमः ।

दत्त्वा स्तुतिं पुण्यतमां ब्रह्मणे स्वस्वरूपिणे ।
कर्तृत्वं सर्वभूतानामन्तर्धाने बभूव सः ॥
ब्रह्मणे ब्रह्मपुत्रेभ्यो नारदाय यथाश्रुतम् ।
तथा प्रोक्तस्तु गान्धर्वि गच्छध्वं स्वालयान्तिकमिति ॥

इति श्रीगोपालतापनीयोपनिषत्